This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

60

॥अथकल्पलताप्रारंभः॥॥

Accession No:- ~~2115~~ M-1222

Title:- कल्पलता।

Author:- सोमदैवज्ञ

Subject:- ज्योतिष

Date:- शके 1791

पत्रे :- (22)

KKSU LIBRARY RAMTEK 441 106 M-1222 Dist Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰ल॰
१

श्रीगणेशायनमः॥सजयति॥स्वभजनरतविघ्नध्वांतविध्वंसभानुःकमलजकमलेशाद्यैस्तुतस्वेष्टसिध्यै॥विलसद्दलघुशुंडादंडसंताडितारिर्दिशतुगिरिसुतायानंदनोमंगलंवः॥१॥यश्चैत्रशुक्लप्रतिपत्सुधीमान्शृणोतिवार्षीयफलंपवित्रं॥भवेद्धनाढ्योबहुसस्यभोगीजह्याचपीडातनुजाचवार्षिकी॥२॥जेतुंयस्त्रिपुरं॰॥३॥चैत्रेपुण्यमयेवसंतसमयेरम्यांप्रतीनूतनांनित्यंयश्शृणुयाद्धीघशमनीमायुर्यशश्रीकरी॥ वेधाविष्णुहरौरविःशशिकुजःसौम्योगुरुर्भार्गवःपंगूराहुरुमारमातनुभवोरक्षंतितंसर्वदा॥४॥श्लोकस्यश्रवणात्सुपुण्यजननंसंवत्सरस्याल्पतांराज्ञोराजकुलेजयोविजयतेमंत्रीफलंबुद्धिदंधान्यंधान्यपतेरसंरसपतेक्षेत्रेषुवृद्धिस्तथासस्यंसर्वसुखंचवत्सरफलंसंशृण्वतांसिद्धिदं॥५॥पंचांगस्थंगणेशंद्विजगणकयुतंपूजयित्वार्थवृंदंसंतोष्यानेकदानैःपरमसुखयुतोभोजयित्वान्नमिष्टं॥शृण्वन्नीतादिवाद्यानिबविविधकथातद्दिनंसंक्रमेतत्क्रीडंस्त्रीभिश्चसार्धंनिशिमपिचनरोयावदब्दंसुखीस्यात्॥७॥मासेनूतनवत्सरैपरिगृहंकुर्याध्वजारोपणंस्नानंमंगलमाचरैर्द्विजवरैःकुर्यान्मनोवां

२

छितं॥प्राहारौप्यसुवर्णरत्नमणयोवस्त्रादिभिःपूजयेच्छ्रोतव्यंद्विजवर्यभाषितफलंश्रेयस्करंपुण्यदं॥८॥तैलाभ्यंगं॰॥९॥पिचुमंदस्यपुष्पाणिपत्राण्यनिंबचिंचनि॰॥१०॥आचित्यायव्यक्तं॰॥११॥आद्यास्मिदेवयुगेकृतयुगादिब्रह्मणोदिनप्रमाणमुच्यते॥करारविंदेनपदारविंदंमुखारविंदेननिवेशयंतं॥वटस्यपत्रस्यपुटेशयानंबालंमुकुंदमनसास्मरामि॥इच्छाशक्तिः॥प्रथमंबुद्बुदः॥तस्मात्अंडं॥अंडादहंकार॥आहंकारात्कमलं॥तस्यपद्मनाभेर्ब्रह्मायत्राश्रीणिवाक्॥तपस्तस्था॥सृष्टिंकुरुते॥तत्रादौचतस्त्रसृतिः॥अंडजाःजरायुजा॥स्वेदजाः॥औद्भिज्जाः॥तासुचतुराशीतिर्लक्षयोनयः॥जलजानवलक्षंतुस्थावरंविंशलक्षकं॥त्रिंशलक्षाणिपशवोचातुर्लक्षंतुमानवाः॥तांबूलानक्षतद्रव्यंतथापुष्पाणिचंदनं॥आनीयब्राह्मणान्सम्यगर्चयेच्छृणुयात्तत॰॥१॥ब्रह्मायुर्मितिभादितोद्विजमुखाद्दाकर्ण्यशृण्वंस्तथाराजादित्यरसेश्वरादिसकलंसंवत्सरादौनृणां॥आयुर्दीर्घमनंतकीर्तिविभवाःसौख्यंसदासंपरांभूयस्त्वंसततंविभूतिनियमाःपुत्रैश्चपुत्रश्चिरं॥२॥ब्रह्मायुर्वर्षशत॥तस्यसूर्यप्रमाणावर्षाचतुर्युगसहस्राणिब्रह्मणोदिनमुच्यते॥

(२)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क.ल.
२

अथ कृतयुगप्रारंभः॥ माघशुद्धपौर्णिमारविवारहस्तनक्षत्रतद्दिने कृतयुगप्रारंभः॥ कृतयुगसंख्या
१७२८००० ब्रह्मणो दिनमध्ये चतुर्दशमनवो भवंति॥ ब्रह्मणः पंचाशद्वर्षस्य प्रथमदिवसे त्रयोदशी घटिका
एतन्मध्ये स्वायंभूः॥१॥ स्वारोचिषः॥२॥ चाक्षुषः॥३॥ उत्तमः॥४॥ रैवतः॥५॥ तामसः॥६॥ एतेषण्मन
वो गताः सप्तमो वैवस्वतः वर्तते॥ अष्टमो सूर्यसावर्णिकः नवमो दक्षसावर्णिकः दशमो यक्षसावर्णिकः॥
एकादशो ब्रह्मसावर्णिकः॥ द्वादशो विष्णुसावर्णिकः॥ त्रयोदशो रुद्रसावर्णिकः॥ चतुर्दशो इंद्रसावर्णि
कः॥ ऐकैकस्येंद्रराज्यं चतुःसप्ततियुगं भवति एवं ब्रह्मा सृष्टिकर्त्ता॥ जलजानवल संचस्थलजालस्य विंश
ति॥ कृमिकं रुद्रसंख्याकपक्षिणा दशलक्षकं॥ त्रिंशल्लक्षकमज्ञाश्च चातुर्लक्षं तु मानुषः॥ ब्रह्मयोनिशतं ग
त्वा देवत्वमधिगच्छति॥ तत्रायुर्लिख्यते॥ मनुष्याणां शतायुष्यवृक्षाणां च सहस्रकं॥ द्वात्रिंशत तुरंगाणां ग
जानां विंशतिशतं॥ व्याघ्राणां च चतुःषष्टी काकव्यालसहस्रकं॥ भल्लुकावान्नराणां च मंडूकानां शतत्रयं
विंशद्वर्षं विहंगानां वर्षमेकं पिपीलिका॥ गर्दभानां चतुर्विंशद्जानां च नवादश॥ शूनां द्वादशवर्षाणि मृगा २

णां सप्तविंशतिः॥ चतुःशतं च लूकानां पिंगलानां शतत्रयं॥ आखूनां सप्तवर्षाणि मार्जाराणां तथा दश॥
चतुर्विंशति गोमहिषी जंबूका षोडशस्तथा॥ मक्षिका नवमासं च उष्ट्राणां शतसंख्यया। चतुःशतं राक्षसा
नां शूकरा विंशतिस्तथा॥ कुक्कुटाषड्वर्षाणि मत्स्यानामयुतं तथा॥ तस्मिन्युगे तालमनुष्योच्च॥२१॥ प
रमायुष्यं १००००० बालत्व १०० जालंधरी जापीठं धर्मश्चतुर्भिश्चरणैर्युतः। अस्थिगतः प्राणः॥ नर्मदा
तीर्थं॥ अमरेश्वरो लिंगं॥ पतिव्रता स्त्रियः॥ तत्क्षणात् शापः। अपत्यद्वयं। एककन्या। एकपुत्रः। ध्याना।
त्सिद्धिः। पुत्रा मातृपितृभक्तिमंतः। कृतयुगमध्ये आवतारः अवतारः॥ मत्स्यावतारः ३५०००० कूर्माव
तारः ३५०००० वराहअवतारः ४३२००० नारसिंहअवतारः ५७६००० तेषां कर्माणि वेदोद्धारः। भूमेर्धा
रणं। जलाकृत्स्थरणं। हिरण्यकेशिविदारणं॥ तत्समये सूर्यग्रहणानि २००० चंद्रग्रहणानि २००० गृहणपनि
।९६ सहस्र। दिनस्य १५ कोटि। ९६। लक्षी। ५० सहस्रसुवर्णमयानि भांडानि। रत्नमयो व्यवहारः। रत्नम
यो दीपः। कविर्भार्गवः। गावः कामदुघाः। मनोमयः कामः। धर्म २० पाप ०। सुरासुरयोर्युद्धं॥ विप्राः सूर्यद

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰ल
३

ष्ठाः। तपोनिष्ठाब्राह्मणः। स्मृतिपुराणधर्मः। दानाअतिथिद्वारेतिष्ठति। अभिगम्यदानं। दैत्यवंशोद्भवाराजानः
आरोमहिपालः। महींद्रः। देवपालः। तेजालः। वेदाक्षः। विशालनंदनः। महीभोजः। क्रतुः। विद्युतः। क्रतुस्था
गाः। मुचुकुंदः। भैरवः। विश्वासी। मरीचिः। कश्यपः। प्रल्हादः। बलिः। अंधकः। कीर्तिमान्। भोगिः। बाणासुरः
कपिलः। कपिलाक्षः। कुस्तुः। विकुस्तुः। कविब्रजाः। एतेराजानः। आसु। अथत्रेतायुगप्रारंभः। भाद्रपदकृ॰
ष्णचतुर्दशीगुरुवारे पुष्यनक्षत्रतद्दिनेत्रेतायुगप्रारंभः। त्रेतायुग१२९६००० तस्मिन्युगेतालत्रय्च्च१४ प
रमायुष्यं१०००० बालत्व१००० मांसगतःप्राणः। द्वारकातीर्थं। कावेरीतीर्थं। कामापुरीपीठं। अमरेश्वरपी
ठं। त्रिपाद्धर्मः। दशाहाच्छायः। जपयज्ञक्षितिषिः। रौप्यभांडानि। रौप्यमयीपृथ्वी। स्वर्णमयोव्यवहारः। कवि
र्वाल्मिकः। ॐकारलिंगं। त्रेतायुगमध्येअवतारत्रयं। वामनावतारः६४८००० परशुरामआवतारः
४३२००० श्रीरामअवतारः२१५००० तेषांकर्माणि बलिनिर्दलनं। क्षत्रियवधः। रावणवधः। दुर्गमयरच
ना। दंडायुधानि। तत्समयेसूर्यग्रहणानि२२००० चंद्रग्रहणानि३००० धर्म१५। पाप। पु। आहूयदान। कि॰

४

चिन्न्यूनपतिव्रता स्त्रियः। सूर्यवंशोद्भवाराजानः। किंचिन्न्यूनतपोनिष्ठाब्राह्मणाः। स्मृतिपुराणधर्म। अपत्ये४
कन्या२पुत्र२पितृभक्तापुत्राः। माताकन्या। सूर्यः। वैवस्वतः। दिलीपः। रघुः। धूम्रः। धूम्राक्षः। रम्यः। र॰
अजः। धर्मः। विकुरुः। लोहिताक्षः। इंदुः। अंगः। अंगलिषः। अभ्यागतः। मरीचिः। इक्ष्वाकुः। हरिश्चंद्र। रो॰
हितत्रिशंकु। समिधामगर। अज। अजपालः। मृत्युः। मनुः। सूर्यः। दशरथ। राम। लवअंकुश। दिली
पः। रघुः। अजः। अतिथि। अंगस्वामी। एतेराजानः। आसु। तस्मिन्युगेरामरावणयोर्युद्धं। अथद्वापर
प्रारंभः। वैशाखशुद्धतृतीयाबुधवारे। अनुराधानक्षत्रतद्दिनेद्वापारप्रारंभः। द्वापर८६४००० तस्मि
न्युगेतालमनुष्योच्च। आयुष्यं१००० बालत्व१०० चर्मगतःप्राणः। कचित्तपोनिष्ठाब्राह्मणाः। कचिद्दिक्षा
चारः। धान्यवतीपृथ्वी। अर्धेपतिव्रतास्त्रियः। व्यभिचारिणीअर्धा। ताम्रमयीपृथ्वी। रौप्यमयंनाणकं
घृतमयोदीपः। वैशंपायनकविः। गावःकामधुघ्याकचिद्घटदोहनं। कपटवादिनोजनः। मर्यसांसे
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection
व्यवहारः। कुरुक्षेत्रंतीर्थं। महाकालेश्वरलिंगं। द्वारकापीठं। याज्ञवल्क्यदानंग्रहणानि। सूर्यग्रहणानि३०००

(३)

क.ल. दिनक्षयं२२५०००तांम्रकांश्यपात्राणि।रौप्यव्यवहारः।द्विपादधर्म।कदाचित्पापः।अर्चनासिद्धिः।द्वापा
४ रमध्येअवतारएकं॥कृष्णावतारः।७७६०००धर्म१०।पाप१०।दैत्यदानवहननं।कौरवपांडवयोर्युद्धं
।कौरवसंहारः।सोमवंशोद्भवाराजानः।पुरुरवः।सोमः।बुधः।ऋबुधः।अनुजः।निर्घोषः।मांधाता।आ
युः।नहुषः।नकुलः।ययाति।पुरुहूतः।कोमलः।कामिकः।कीर्तिमान्।नीलघोषः।मांधाताः।आक्षः।पु
रूरवसा।अधीश्वर।विषश्रवाः।जड्डमुनिः।सत्राजय।आधारेश्वरः।तत्परः।पुरुषः।शांतनु।चित्रकः
चित्ररथः।पांडुः।धर्मः।अभिमन्युः।परीक्षीति।जन्मेजय।नरवाहनः।एतेराजानःआसन्।अथक
लियुगप्रारंभः।कार्तिकशुद्धनवमीसोमवार तद्दिने कलयुगप्रारंभः।कलियुग४३२०००अस्मिन्यु
गेअवतारद्वयं।बौध्यावतारः।४३१०००कलंकी८२१।कलियुगमध्येउच्चत्व३॥आयुष्य१००बाल
त्व१०अन्नगतःप्राणः।कलावायुः।भागीरथीतीर्थ।विश्वेश्वरोदेवता।वाराणसीपीठं।धर्मपादः।१
कचित्त।नास्तिशापः।सेवपादनं।सतिविश्वासेहरिस्मरण।ग्रहणानि४३१०००दिनक्षय२०७७०३०० ४

५

मृण्मयलोहभांडानि।तांम्रमयोव्यवहारः।कलियुगमध्येधर्म५।पाप१५।शककर्तारःयुधिष्ठिरः।३०४४।
विक्रमः।१३५शालिवाहनः१८०००विजयाभिनंदनः१००००तन्मध्येअवतारश्चैकः।त्र्यंबकेश्वरलिंगपूज
नं।मायापुरपीठंगौतमीतीर्थ।तत्रराजानः।पृथ्वीभोक्तारः।युधिष्ठिरः।शालिवाहनःविक्रमः।नागार्जुनः।
विजयाभिनंदनः।कल्किःएतेराजानः।ततोम्लेंछदुत्पत्तिः।तिमिर्लिंगशाहोराजस्थित्यब्दः।वर्ष२४मास११दि
न२४तदुपरिबाबलिंगशाहोराजस्थित्यब्दः।वर्ष२०मास८दिन२४हुमाहुजाहुर्लिंगोराजस्थित्यब्दः।वर्ष११
मास६दिन२१अकबरशाहोराजस्थित्यब्दः।१४मास११दिन२७शाहराजानराजस्थित्यब्दः।वर्ष१८मास
४दिन१०अवरंगशाहोराजस्थित्यब्दः।वर्ष२५मास८दिन२४चिन्मीशाहोराजस्थित्यब्दः।वर्ष२२मास१ 5
दिन४वृद्धनीजामल्लशाहोराजस्थित्यब्दः।वर्ष५०मास४दिन२७तदुपरिशूद्रराजानः।रामराजाव
र्ष२०मा.६दिन२४भोजराजाराजस्थित्यब्दः।वर्ष४०मास१दिन२७दिनानाथराजावर्ष७०मास११
दिन२०शिवाजीराजावर्ष२०मास४दिन२७राजारामवर्ष४४मास५दिन२१रामराजावर्ष२०मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं॰ल स८ दिन११ संबाजीराजा ५८ मास८ दिन१ बलवंतशिंग वर्ष ३२ मास१० दिन १ एते राजानः राज्यमकुर्वे

५ न। पृथ्वी बीजहारिणी।। लोलंगता ब्राह्मणाः। लौकिकधर्माः। मंदचक्षुः। आयुष्यं शतायुः १०० बालत्वं दश
वर्ष १० अपत्यानि २० यदृणसंख्या नास्ति। गृहे मृन्मयानि पात्राणि।। ताम्रमयं माणकं। स्नेहमयो दीपः
असत्यवादिनो जनाः। पित्रद्वेषिण पुत्राः। पुरुषो च्चता ।३।। विभिचारिणी बहु। कश्चित्पतिव्रता स्त्रि
यः। कल्पांते अंगुष्टपर्वमात्रं पुरुषं स्यात्।। स्वस्तिश्री सूर्यसिद्धांतमतेन जगदुत्पत्तिस्थितिलयका
रणस्य ब्रह्मणः परमायुः वर्षशतं तदर्धं जातं। तन्मानं एकघटि। ततः ब्रह्मदिनं निमिषापेशतायुपर्यं
शतं गणितक्रमः सूर्यसिद्धांतमतेन तत्र चतुर्युगं गतं एकं निमिषं निमिष संख्यायां कुर्युः निमिष सं
ख्या ४३२०००० एकं निमिषं निमिषानंतरं विपलसंख्या २५९२००००० विपलानंतरं पलं १२५९२००००००
तत्पलानंतरं घटि १५५५२०००००० घटिनंतरं दिनमान ४६६५६०००००००० एवं दिनघटित्तावत्ती रात्रिः
अहोरात्रपरिमाणं १३३१२०००००००० प्रहर घटि ११६६४००००००००००० प्रहरत्रयसंख्या ११९३६०००००००० ५

६

एवं एकमासः ११९३६०००००००० वर्षसंख्या ४७९२३२००००००००० एकवर्षं एवं वर्षशतं तदर्धं भुक्तं॰
अथ ब्रह्मणो द्वितीये प्रहरार्धे प्रथममासे प्रथमपक्षे अहानी चतुर्दश घटिकाः जातः त्रिचत्वारिंशत्पलानि
तन्मध्ये स्वायंभुवादिषण्मनवो गताः।। तन्मानं वर्षादि २४३५१०००० स्वायंभूवाः।। स्वारोचिषः।। उत्तमाः
रैवताः।। तामसाः।। चाक्षुषाः।। सप्तमे वैवस्वतमन्वंतरे। अष्टाविंशतिमहाकलयुगे ४३२००० तन्मध्ये षट्नृ
पाः शककर्त्तारः ३०४४००० उज्जन्यां विक्रमशक १३५००० प्रतिष्ठाने शालिवाहनशाक १८००० वैररण्यां
विजयाभिनंदनशक १०००० कावेरी पट्टणे नागार्जुनशाक ४०००० गौडवैकटदेशे कल्किशाके ८२१।। इ
ति ब्रह्मदिनं।। ।। ।।नंदासंवत्सरादौ तु दर्शनं दानकारयेत्।। गरविद्धा प्रकर्तव्या हि मुहूर्त्ता भवेयदि।।१।।
कलामात्रमिदं चैत्रे प्रतिपत्तत्र वासरे।। सराजा विदितस्तत्र वैदर्भस्तत्र निश्चितं।।२।। मुहूर्त्तं वर्त्तते दर्शी (6)
मांगल्यं तत्र वासरे।। वित्तापत्यकलत्राणि तत्सर्वं नश्यति ध्रुवं।।३।। अथ यदि क चैत्रे शुक्लपक्षे भवेत्ताक
थमपि यदि वारौ द्वौ तदा भूपतिकः।। प्रथमदिवसवारः कल्पितो गर्गमुख्यैः गुणवति यदि भूपे राज्यमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क० ल
५

गः स एव ॥४॥ प्रतिपद्दर्शसंधिश्चेन्मध्यान्हात्परतो यदि ॥ तदा तद्दिनपो राजा हूणवंगेषु जायते ॥५॥ किं
स्तुघ्नं करणं तत्र जायते यत्र वासरे ॥ स राजा वेदितस्तत्र खषकौंकणकस्थितः ॥६॥ संवत्सरस्य चांत्यस
कुहूर्भवति यद्दिने ॥ अपरो वासरो योसौ सोयं राजा विनिर्दिशेत् ॥७॥ इति संवत्सरफलं वत्सरादौ स्मृणो
तियः ॥ संभवेत्सुत्रपौत्राद्यो मोदते सुतरां भुवि ॥८॥ अथ विशोपकानयनं ॥ शाके रामैराहते ससभक्ते शे
षं द्विघ्नं पंचयुङ् नीरवृष्टिः ॥ लब्धं शाकं कल्पयित्वा मुहुस्तत्पूर्वं सर्वं कर्म सम्यग्विधेयं ॥१॥ धान्यं तृणं
सीतमुष्णं वायुवृद्धिर्विनाशनं ॥ अंतिमो विग्रहो ज्ञेयो गणितार्णवपारगैः ॥२॥ शाके ब्धिगुणिते शैलैः
भक्तः शेषं द्विसंगुणं ॥ एकोनसहितं स्तुत्स्यादेवमग्रे मुहुः फलात् ॥३॥ तृष्णा निद्रा तथालस्यं उद्यमः शां
तिरुग्रतः ॥ क्रोधो दंभस्तथा भेदो मैत्री स्यात्तदनंतरं ॥४॥ ततः स्याद्रसनिष्पत्तिः फलनिष्पत्तिरग्रतः ॥ उ
त्साहस्तदनु प्रोक्तः क्रमोयं सर्वसंमतः ॥५॥ शाके सप्तगुणे नंदैर्भाजिते सविशेषकं ॥ द्विघ्नं त्रियुक्तं शलभाः
कैर्भवेल्लब्धतो मुहुः ॥६॥ अग्रे मुकामूषकाः स्युरतिवृष्टिरग्रतः ॥ अवृष्टिः स्यात्स्वचक्रं च परचक्रं च ५

७
नाणकं ॥७॥ ततो रत्नानि वस्त्राणि घृतं तैलं दुकूलकं ॥ ऊर्णवस्त्राणि सूक्ष्माणि कार्पासानि च वल्कलं ॥८
सुवर्णं स्यात्ततस्ताम्रं वंगं तदनु रौप्यकं ॥ लोहं खर्परसूतारव्यं कांस्यं पैत्तिलकं तथा ॥९॥ शाके ष्टगुणिते
नंदैर्भाजिते सतिशेषकं ॥ द्विघ्नं त्रियुक्तं सुग्रास्यात्प्रकृतिर्लब्धतोग्रतः ॥१०॥ सौम्यः स्वभावः संप्रोक्तः स्या
त्पापप्रकृतिस्ततः ॥ पुण्यस्वभावस्तदनु व्याधिर्भैषज्यमुग्रतः ॥११॥ आचरः स्यादनाचारो मरणं खलु ज
न्म च ॥ स्याद्देशोपद्रवो नूनं देशः स्वास्थ्यं ततः परं ॥१२॥ चौरभीश्चौरशमनमग्निभिरग्निनाशनं ॥ विषभु
क्तिर्विषशमः सेवकत्वं ततः परं ॥१३॥ स्वामित्वं स्यान्निजधनं ततः परधनं भवेत् ॥ द्यूतं च पूंश्चली कर्म
जारणं जारणात्ययः ॥१४॥ मारणं मारणशमस्तंभनं स्तंभनात्ययः ॥ मोहनं मोहनशमस्ततउच्चाटनं भ
वेत् ॥१५॥ उच्चाटनोपशमनं स्याद्दृशीकरणमतः परं ॥ वशीकरणनाशः स्याद्वातप्रकृतिरग्रतः ॥१६॥
स्यात्पित्तप्रकृतिः पश्चात्कफप्रकृतिरीरिता ॥ द्वंद्वजः सन्निपातश्च यशश्चापयशो भवेत् ॥१७॥ गर्वो गो
त्रप्रपंचः स्याद्भूतबाधा ततः परं ॥ भूतबाधोपशमनं ग्रहदोषोथ तच्छमः ॥१८॥ पंचभिः सप्तभिर्गोभि

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु.ल
७

शेषः पृथकताडिते वैशाके सप्तभक्ते सति॥ शेषकं व्याहृतं पंचयुक्तस्युक्रमादंडजाजारजास्वेदजोद्भिजश्च
का॥१९॥ खखाभ्रतर्कभूयमे कलेश्च शेषकं भजेत्॥ फलंद्विपुण्यमीरितं नरवच्युतंतु पातकं॥२०॥ दृष्ट्वा
द्विपातकं तायेक्रमात्सोक्ताविशोपका॥ तद्योगेन खवृद्धे षास वाँ निष्पत्तिरीरिता॥२१॥ इति विशोपकाः॥
रवौ रस६ विधोतिथ्यो१५ भौमे ष्ट८ राहथ्यो१७ बुधे॥ गुरौरेकोनविंशत्या सुक्रे वर्षकविंशतिः२१॥ शनेोश्च
दश वर्षाणि राहोश्च द्वादशाब्दकं॥ स्वस्वाभि वर्षाधिपवत्सरे क्यंत्रिघ्नं शराद्यंतिथिभक्तशेषं॥ आयो यल
ब्धं त्रिगुणेषु युक्तं तिथ्याप्तशेषं व्ययसंज्ञकं स्यात्॥१॥ इत्यायव्ययः॥ चैत्रादौ मेषकर्काद्री तुलाकार्मुक
गेरवौ॥ नृपमंत्री धान्यमेघा रससस्याधिपाः क्रमात्॥१॥ चैत्रस्य शुक्लप्रतिपत्तिथौ यो वारः स उक्तो नृप
तिस्तथाद्वे॥ मेषप्रवेशे किल भास्करस्य यस्मिन्दिने स्यात्स तु नस्य मंत्री॥२॥ कर्कप्रवेशे दिनपः स उक्तो
सस्याधिनाथो मुनिभिः पुराणैः॥ आर्द्राप्रवेशे दिनपः स उक्तो मेघाधिपः प्राक्तनविप्रवर्यैः॥३॥ तुलाप्र
वेशे हनि यस्य वारो रसाधिपो यं नियतं प्रदिष्टः॥ चापप्रवेशे दिवसाधिनाथो धान्याधिपो सौ कथितो मु ७

८

नींद्रैः॥४॥ स्वानंदाय सनंदनादिनतसत्पादारविंदद्वयं नानानंदनिदानमेकरदनं तुष्टार्दनं महृयं॥ भा
लेंदुं मदमत्तदंतिवदनं दानंदधानं सदा तं देवं मदनारिनंदनमहं वंदे शतुंदं मुदा॥१॥ मत्स्येंद्रनाथचरण
स्मरणप्रवीणः श्रीरुद्रभट्टतनयो विनयोपपन्नः॥ सोमाभिधानगणको गणकोरुतुष्ट्यै संवत्सरादिफल
कल्पलतां तनोमि॥२॥ हीनेस्मिन् नृपशालिवाहनशके पूर्णांगबाणेंदुभि॥१५६०॥ यीता द्वाः खलु चात्रजा
निगदितास्ते नेत्रचंद्रैर्युताः॥ व्योमांगैः परिशेषिताः प्रभवतः संवत्सरो दक्षिणे रेवातः प्रथिता भवेत्सनव
भिर्युक्तस्तथैवोत्तरे॥३॥ अथ संवत्सरफलं॥ क्षितिपतिरपभीतीः प्रोल्लसद्दंडनीतिर्यदपि जलदपंक्तिर्मध्य
वृष्टिं करोति॥ तदपि कणसमृद्धिर्हीनरोगो भवाब्धिः प्रभवउदितशुद्धिः स्याज्जनः साधुबुद्धिः॥१॥ सकलमनु
जतुष्टिर्लोकदोषैकदृष्टिः क्षितिपतिरतिवृष्टिर्वह्निभीतिप्रपुष्टिः॥ बहुधनकणचारा मेदिनी शांतचौरा वि
भवभवशरीराः साधवः क्षीरपूराः॥२॥ पुत्रमित्रवनितानुरागतः स्याज्जनः प्रविशतां सुरंगतः॥ दुष्टभूपनि
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection
करः परस्परं संकुनाम्निविदधीतसंगरं॥३॥ नृपाः स्वल्पसंग्रामकर्माभिधानाजनाः किंचिदिस्यायमैः पीडयमा

8

ल० ना॥स्तथापिप्रमोदान्वितास्त्यक्तदंभाभवेयुःप्रमोदाभिधेभीष्टलीला॥४॥क्लेशिनोयदपिदेहिनोखलंनस्त्यजंति
८ निजवर्मनिर्मलं॥वर्षणाद्बहुकणाःप्रजापतिःख्यातनाम्निबहुसौख्यसंभृतिः॥५॥अन्नदानवशभोजना
निजान्प्रीणयंतिबहुशोतिथिव्रजान्॥जन्मिनःस्ववनितासुखान्विताभूभृतांरणसिसंगरेरता॥६॥स्युर्द्विजा
बहुमखक्रियोत्सुकावारिपूरिततडागवापिकाः॥भूप्रभूतधनधान्यसंयुताश्रीमुखेनरिपुतानरोगि॥७॥
अल्पवृष्टिवशितोल्पसस्यताभूभृतामतिरणक्रियामता॥भावनाम्नियदपिप्ररोगिणःस्युस्तथापिसुखि
नःप्ररोगिणः॥८॥क्षितिःसतृणाधेनवोदुग्धपूर्णाःसुवर्णाप्तिसंतोषिणःसर्ववर्णाः॥सुभिक्षंनृपादेवभू
देवभक्तायुवानस्त्रियोन्योन्यसक्ताःप्रसक्ताः॥९॥युद्धकर्मणिरताअवनीशाःस्युःपरस्परकृताभिनिवे
शाः॥भूमिसृष्टिवशतःकणपुष्टाधातृनाम्निजनताधनपुष्टाः॥१०॥सुःसुवर्षणकराःपयोधराइक्षुशा
लिरुचिरावसुंधरा॥नैवसागरपराःक्षितीश्वराईश्वरेषुचितराःसदानराः॥११॥फलसस्ययुतंतुमहीत
लंसुपयोभिर्विषपयोदमंडलं॥अवनिपतिर्मानसांतरेणनवनीतिर्बहुधान्यवत्सरे॥१२॥ज्वराधिकतरात्तु ८

राःअतिदुरापसस्यांबलदर्पाश्रितधराधरानिरनुरागदारानराः॥अवर्षणकराश्चीराज्जलधराःसचौराधरा
प्रमाथिनिपरस्परात्द्रवरताधराधीश्वराः॥१३॥अतिसस्यसमन्विताचनाघनपंक्तिर्बहुतोयदायिनी॥
जितवैरिगणास्तुपार्थिवाःसुखिनोविक्रमनाम्निमानवाः॥१४॥सुरुचिराधनधान्यचयैर्धराजलधरा
जलवर्षणतत्पराः॥द्विजवराःसततंविहिताध्वराःरणपराःवृषनाम्निमहीश्वराः॥१५॥अतिशिल्पक
लादिभिःसमेताःसुखिनःस्युःसकलजनाःसुव्रताः॥भुविमेघगणाःकृतांबुवर्षसतिधान्यंबहु
चित्रभानुवर्षे॥१६॥आतिवादवेस्यान्मतिर्भूपतिनांमहाव्याधिरोधीश्वसर्वेजनानां॥सुभिक्षंकचित्
क्वापिसौख्यानिभूतिःसुभानौकचिद्दृष्टिमिंद्रःकरोति॥१७॥पार्थिवाधनरतारुजान्विताःमानवागणित
विघयायुताः॥भूरिधान्यफलसंभृतिःक्षितिस्तारणेघनअतिप्रहर्षति॥१८॥घनकणाःसुलभाभुविनीर
दाकृष्टकराजिविराजितनीरदाः॥परमधर्मविधायिनिपार्थिवेसतिजनेषुसुखंबहुपार्थिवे॥१९॥रणत
त्परभतांबलैःमदिताभस्तरगादिसंकलैः॥जननातिनतारताव्ययेधनधान्यादिसुखान्विताव्यये॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ॰ ल॰ ॥२०॥ जनताकणतोषिनागदासुराजंहसतिस्वसंपदा॥ इह सर्वजिदाख्यवत्सरे मरणं यातिनृपारणा
१ जिरे॥२१॥ लोकपालमपराअवैरिणः स्युर्नृपाजलधराःप्रवर्षिणः॥ पुत्रपौत्रधनधान्यतोषिणः सर्वभाः
रिणिसदाशरीरिणः॥२२॥ अतिधान्यफलप्रकरावसुधाजलदाजलवृष्टिकराबहुधा॥ मनुजाअभयाअ
गदाससुताःक्षितिपाश्चविरोधिनिवैररता॥२३॥ मनुजाःक्षितिपारुचिरांप्रकृतिंप्रविहायचयातिपरांवि
कृतिं॥ स्वपदच्युतिताःपरदेशगताविकृतेकणवस्त्रधनाधिकृता॥२४॥ अवनीपतयाविकारयुक्ताःस
ततंसंगरकर्मणिप्रसक्ताः॥ मनुजःसरुजःस्युरल्पवृष्टिस्तदपिस्यात्खरनाम्निधान्यपुष्टिः॥२५ धरणी
कणयुकभवेदलंसुजलंवर्षतिमेघमंडलं॥ क्षितिपासधनाबुधार्थनेनिरतालोकसुखानिनंदने॥२६॥
अभितोप्तसस्यपुणिलासजलाजनताभवेदविकलासकल॥ क्षितिपाअतिवनिरताविजयेल्पकमय
धान्यमखिलंविजये॥२७॥ सदानंतधान्यादिकीर्णाधरित्रीपयोदाबलिःस्यात्पयोवृष्टिकर्त्री॥ विवाहोरु
यज्ञादिसत्कर्मसिद्धिर्जयेवापिकारामकूपादिवृद्धिः॥२८॥ गोधूमशालिप्रयुलेक्षुयवैरुपेतासर्वसहाल्प १

जलदःकिलवृत्रदंता॥ चौरैर्गदैश्चनितरांपरिपीड्यमानः सर्वेजनोभवतिमन्मथनाम्निदीनः॥२९॥ देहि
नःसुगदिनःस्युरधीराद्युतिचौरभयनाधनचौराः॥ नूनमल्पजलदाघनमालादुर्मुखेरिपुजिताःक्षितिपा
लाः॥३०॥ रणसुदृढभूपालबाणाग्रकल्याहतारिव्रजासप्रवाहोरुकूल्याःधरामध्यमस्यार्घकीलालवृष्टि
स्तथापिश्रियाहेमलंबेनृपुष्टिः॥३१॥ रणकर्मरताःक्षितिपालगणाध्रुवमल्पतराभुविवस्त्रकणाः॥ जलवृ
ष्टिरतीवजनागदिनस्तदपीहविलंबिनितेसुखिनः॥३२ स्वल्पंजलंवर्षतिरैवराजः क्षितीश्वराश्चित्तवि
कारभाजः॥ प्राग्धान्यमल्पंपरधान्यवृद्धिर्विकारिवर्षेनृषुरोगव्याधिः॥३३॥ नानासंपत्पोषिताभूमिपा
लाःसर्वेलोकाःसौख्ययुक्ताःसुशीलाः॥ देवाधीशोतीवकीलालदस्याच्छार्वर्यब्देमेदिनीसस्यपूर्णा॥३४ (10)
जलवर्षणतोग्र्यधान्यनाशःसततंस्यादतितस्कारप्रकाशः॥ भृशभीतिभयंगदातिरेकःसुखहीनःप्लवना
म्निसर्वलोकः॥३५॥ धनधान्ययुताधराभृशंपयसवृद्धिमथवांबुदोनिशं॥ सममुपात्तविवाहमंगलाःशुभ
कृन्नाम्निजनानिराकुलाः॥३६॥ मित्रभाववमुपयातिभूभृतःसस्यसंपदधिकांबुवृष्टितः॥ शोभनच्छर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग·ल· दिरोगपीडितः स्याज्जनस्तदपिरोगपीडितः॥३७॥कामेनासाभूमिपालाःसमस्तायुद्धेसक्ताईतिजाभी
१० तिरुग्या॥क्रोधिन्यब्देमध्यवृष्टिःकणानांवृद्धिःस्यातांक्रोधलोभौजनानां॥३८॥स्वल्पंजलंजलदमंडल
मादरातिप्रायेणधान्यमखिलंविलयंप्रयाति॥लक्ष्मिश्चिरादधिगतापिजलान्नृपाणांविश्वावसौभव
तिरोगभयंनराणां॥३९॥अग्रधान्यमधिकंजलमल्पंभूभृतांभवतियुद्धमनल्पं॥स्याज्जनोगदवशा
द्रुतधामावत्सरोयदिपराभवनामा॥४०॥क्षितौदुर्लभंधान्यपुष्पादिनि त्वंक्षितीशामथःकुर्वतेयु
द्धकृत्यं॥पयोवर्षणंस्वल्पमत्यंतरोगःप्रजानांयदावत्सरःस्यात्प्लवंगः॥४१॥वसुधाल्पधान्यफल
मूलसमेताभृशभीतिरल्पजलदोबलमेता॥नृपतिप्रजोविहितसंगकर्मायदिवत्सरोभवतिकील
कशर्मा॥४२॥नित्यमध्वररताःक्षितिदेवाःश्रीयुताअरिपवोनरदेवा॥भूपभूतजलताबहुधान्या
सौम्यनाम्निजनताभयशून्या॥४३॥जलवृष्टिकराःपयोधरापशुवृद्धिःसुखिनोखिलानराः॥क्षि
तिपानिरतानमत्सरेसतिसाधारणनाम्निवत्सरे॥४४॥असदाचरणाविगतद्रविणाःकृतवैरिग १०

णानरपालगणा॥सलिलंनददातिपयोदततिर्जलदाभयमेतिविरोधकृतिः॥४५॥गदचौरजतापयुता
जनताकुभृताविततापहवताभिमताः॥जलदःप्रचुरंनददातिपयःपरिधाविनिधान्यधनापचयः॥४६॥
जलवर्षणकृन्नदेवदेवःकणनाशःकुभृतांविरोधभावः॥कथमप्यभिजीवतिप्रमादीनचसद्योयदिव
त्सरःप्रमादी॥४७॥जलदाजलदानतत्पराःक्षितिपालाःक्षितिपालनादराः॥वसुधाधनधान्यसंकुला
जनतानंदशताधनाकुला॥४८॥राक्षसाह्वयवदयोनितांजनारोगिणोनितरकार्यसाधनाराक्षसेविहित
धान्यनाशनाभूरिवारिपरिवर्षणाघना॥४९॥क्षितिपालकुलंरणकर्मकरंधनधान्यफलादिकमल्पत
रं॥अनलादिकभीतिरिलाविजलानलनाम्निजनाःसकलाविकला॥५०॥क्षितिपाभुजवीर्यजितारिग
णाभयभीतिरियंक्षितिरल्पकणा॥दधतेजलदाअतिनिर्जलतामिहपिंगलनाम्निनभंगलता॥५१॥
ईतयोयदपिरोगभीतयःस्युस्तथापिधनधान्यसंचयः॥लोकलोकपतयोनिरोधयःकालयुक्तशर
[illegible]

11

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं॰ल॰ तिमेघनिकराःप्रचुरांबुधाराःसिद्धार्थिनाम्निधरणीपतयोविवैरा॥५३॥धान्यनाशनमतीवतस्क
११ राःस्वल्पवर्षणकराःपयोधराः॥राजवृंदमखिलंरणोन्मुखंरौद्रनाम्निजगतोल्पकंसुखं॥५४॥मे
दिनीपतिगणोतिदुर्मतिःसंततंनिहतशत्रुसंततिः॥दुर्मतौतदपिसर्वदेहिनःपुत्रपौत्रधनमित्रशोभि
नः॥५५॥भूभृतांबहुसुखानविग्रहःस्यात्क्षितौसकलधान्यसंग्रहः॥पूर्वदेशविलयोपरेस्थिराडुंदु॰
भौसुजलदाःपयोधरा॥५६॥धरणीरहिताःकणादिनाधरणीनाथगणोन्मनताः॥गदतोजगतोगशोष
णंरुधिरोद्गारिणिनांबुवर्षणं॥५७॥सस्यंप्रणश्यतिभयंबहुतस्कराणांयुद्धंपरस्परमतीवनरेश्व
राणां॥रक्ताक्षिनाम्निनजलंप्रबलोनिदाघःस्यादितिरोगविकलोसकलोजनौघः॥५८॥आदिम॰
धान्यलयोतिमयोषःस्यात्क्षितिपालगणोधिकरोषः॥मध्यमंबुददातिसुरेशःक्रोधननाम्निध॰
नादिकनाशः॥५९॥भूभृतःपरमयुद्धकारकाःचौरभीरजलदाबलाहकाः॥इक्षुमूलमधुधान्य॰
नाशनंस्यात्क्षयेतदपिलोकजीवनं॥६०॥इतिसंवत्सरफलानि॥ ॥कृत्तिकादितयंदेहंवत्सर ११

स्यप्रकीर्त्तितं॥पूर्वाषाढद्वयंनाभिःसार्पद्वंकुसुमंमघा॥१॥निपीडितेपापखगेनदेहेवातासवातानलभी
नृदेहे॥नाभ्यांभयंस्युज्जनितंनराणांबालादिपुष्पेहृदयेनधान्यं॥२॥इतिसंवत्सरशरीरफलानि॥अथरा॰
जविचारः॥तत्रादौगर्गमतं॥चैत्रशुक्लादिदिवसेयोवारःसोब्दपःस्मृतः॥शुभंवाप्यशुभंसर्वंतस्मादेवफ
लंस्मृतंउदयप्रतिपद्धेषमूहूर्तद्वयमेवचेत्॥तस्मिन्दिनेद्वियोवारःसतुसंवत्सराधिपः॥२॥इदंनर्मदोत्त
रदेशस्थैरेवांगीक्रीयते॥केचित्तुचांद्रमानेनचैत्रशुक्लप्रतिपत्प्रथमेक्षणेसंवत्सरःप्रवर्ततेतत्रवारस्तंसं
वत्सरेशंवदंतितत्सायशोगुर्जरदेशेप्रसिद्धः दाक्षिणात्यास्तुकश्यपमतमंगीकृत्यसूर्योदयकालीनप्रति
पद्वासरंवत्सरेशमाहुस्तथाचकश्यपवचनं॥चैत्रशुक्लाद्यदिवसेसर्किंस्तुभेथवाबवे॥अर्कोदयेतुयोवा
रःसोब्दपःपरिकीर्तितः॥अथवाबवइत्युक्तेदिनद्वयेपिप्रतिपत्त्यादौपूर्वएववारोराजा॥चैत्रमेषादिवा (12)
पार्द्रातुलाकर्कटकेषुच॥नृपोमंत्रीधान्यसेधारससस्याधिपाःक्रमात्॥अनेनोक्तं[illegible]यादिक्रमोनर्मदोत्तर
देशस्थानांमंमतः॥तत्रकेचिज्जगन्मोहनकश्यपमतमाहुंति[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्यो.र.
१२

लीमृगादिवाराधिपतिः क्रमेण॥ राजाचभूपो ह्यथसस्यनाथो रसाधिपोनीरसनायकश्च॥१॥ आर्द्रादिना
थोधननायकःस्याद्धान्याधिपश्चापदिनादिवारः॥ दाक्षिणात्यानांतुज्योतिःफलोदयादेवक्रमोभिमतःत
च्यया॥ चैत्रादिमेषकर्कोद्रीतुलाकार्मुकवासराः॥ नृपोमंत्रीधान्यमेघारससस्याधिपाः क्रमात्॥१॥ एवंस
देशतोव्यवस्थाज्ञेया॥ अथराजफलं॥ धान्यपुष्पफलमूलविनाशश्चौरभीर्भवतिनोदकलेशः॥ भूमिपा
लकलहोगदकोपः प्राणिनांदिनकरोयदिभूपः॥१॥ धेनवोतिपयसोधिकतोषः प्राणिनांजलवशात्कण
पोषः॥ भूभृतोविहितसद्दिजपूजाजायतेहिमकरोयदिराजा॥२॥ मेदिनीधनकणादिवर्जितामेदिनीसं
ततिराहवैरता॥ वह्निचौरगदभीःक्वचिज्जलंमंगलेक्षितिपतौनमंगलं॥३॥ धान्यैश्शासकलंमहीतलं
श्रीयुतंनृपकुलंनिराकुलं॥ भूरिवारिशुभकार्यसाधनःस्याज्जनोयदिनृपोत्रबोधनः॥४॥ धेनुवृंदमति
दुग्धसमेतंवर्षणात्कणकणादिनितांतं॥ यज्ञकर्मणिसतामनुरागः पार्थिवेसुरगुरौनचरोगः॥५॥ वसु
मतिजलपूर्णजलाशयाधनयुताजनतारहितामया॥ फलकणोपचयोखिलधेनवःसुपयसोनृपतिय १२

दिभार्गवः॥६॥ फलधान्यअधिकाल्पताचजनतातस्कररोगपीडिता॥ क्षितिपालगणोरणेरतःक्षितिपालो
यदिभानुमत्सुतः॥७॥ इतिराजफलं॥ अथमंत्रीफलं॥ पयोधान्यपुष्पादिकानामभावःसदाभूमिपानांमिथो
वैरभावः॥ जनेरोगचौरादिभीतिंदधानःक्षुधापीडितश्चेद्रविःस्यात्प्रधानः॥१॥ क्षितिदेवपतिःकृतयज्ञम
तिःक्षितिपालरतिःफलधान्यभृतिः॥ पशवोसुखिनोजलदोभ्रगणःसचिवोयदिकोरोहिणीरमणः॥२॥ ध्रुव
मवर्षणतःकणनाशनंज्वलनतस्कररोगनिपीडितं॥ रणपराःक्षितिपाबुधवंदनेननीरतासचिवेक्षितिनं
दने॥३॥ स्यात्कोशवृद्धिर्धरणीश्वराणांगावःसुदुग्धानगदोनराणां॥ गोधूमशालीक्षुयुताधरित्रीपूर्णोदकाचे
च्छशिजोत्रमंत्री॥४॥ पयोधराभूरिदिशंतिपाथोधात्रीकणाद्यैर्जनमुद्विधात्री॥ पृथ्वीभृतांसंपदतीवपृथ्वी
मंत्रीयदास्यात्सुरराजमंत्री॥५॥ अतिदुग्धयुतोगवांगणःक्षितिपानांनपरस्परंरणः॥ पशुवृद्धिरतीववृष्टि
तःकणपोषाःसचिवोयदासितः॥६॥ नैवधान्यफलपुष्पसंचयःस्यादवर्षणवशाज्जगत्क्षयः॥ वह्निभीप्र
चुरतस्करोदयःसूर्यजेत्रसचिवेमहाभयः॥७॥ इतिमंत्रीफलं॥ अथाग्रधान्येशफलं॥ गवंदांबचक्षिर्गटचो

(13)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰ल॰ रभीतिः क्षितीश्वराणां रणाकर्मशक्तिः॥ गवामदुग्धं कणपुष्पनाशश्चेदग्रधान्याधिपतिर्दिनेशः॥१॥ धान्या
१३ धिकं गोषु दुग्धप्रभूतं पुत्रैः पौत्रैर्लोकवृंदं समेतं॥ मेघव्राता भूरि वर्षंति पाथश्चंद्रश्चेत्स्यादग्रधान्यदिनाथः
॥२॥ जलकणादिकमल्पमसंचयं ज्वलनतस्करजं प्रचुरं भयं॥ जगदसंगदवृद्धियुतं सदा क्षितिसुतो यदि मु
धान्यपतिर्यदा॥३॥ सुखिनो भयवर्जिता नरा धनधान्याद्बुभिरन्विता धरा॥ नरतिं कुभुजारणादिके शशिपु
त्रे प्रथमधान्यनायके॥४॥ धनधान्यफलादिसंयुता धरणी स्याज्जनता मुदान्विता॥ यदि वाक्पतिरग्रधान्यपः
प्रचुरं वारिददाति देवपः॥५॥ विविधधान्यफलोपचयोद्भुतः सकललोकगणो गदवर्जितः॥ नृपतयः सहि
ता बहुसंपदा प्रथमधान्यपतिर्भृगुजो यदा॥६॥ धान्याभावः कोशहानिर्नृपाणां मंदा वृष्टिः स्याज्जयस्तस्क
राणां॥ रोगाद्दन्हे चातिपीडा जनस्य प्राग्धान्येशश्चेत्सुतो भास्करस्य॥७॥ इत्यग्रधान्येशफलं॥ अथ मेघेशफ
लं॥ सदा दुर्दिने धान्यपुष्पादिनाशः करोति क्वचिन्निरवृष्टिः सुरेशः॥ भवेत्तस्करोपद्रवो मूषकेति दिनेशे घने
शे भवेद्व्याधिभीतिः॥१॥ गवां याहशां सस्यपुष्पादिकानां प्रवृद्धिं सुखं भूरि विद्वज्जनानां॥ नदीकूपवापीतडा १३

गेषु पाथः प्रभूतं यदा चंद्रमा मेघनाथः॥२॥ अनिलः प्रबलाग्निभयं प्रचुरं धनधान्यफलादिकमल्पतरं॥ गदको
पवशाज्जगदल्पबलं क्षितिजे घनपे सति नैव जलं॥३॥ क्वचिदामयेन विकलं लिपिकाव्ययवित्तकरणं च वृ
ष्टिरलं॥ जलवृष्टितः सकलधान्यभृतिः शशिनंदनो यदि पयोदपतिः॥४॥ सुरपतिकुरुते जलवर्षणं विविध
सस्यफलादिकपोषणं॥ द्विजगणो मखकर्मकरः क्षितौ जलधराधिपतौ सति वाक्पतौ॥५॥ द्विजकुलम
निशं मुदं प्रयाति त्रिदशपतिप्रबलं बलं ददाति॥ अगणितकणसंयुता धरित्री जलदतिर्यदि पूर्वदेवमंत्री
॥६॥ चौरव्रजादतिभयं नृषु रोगभावः स्यात्कंदमूलफलपुष्पकणाद्यभावः॥ न क्वापि वृष्टिरवनीपतिकोपश्र
निःश्रीतं क्वचि द्दहुयदा घनराजयेति॥७॥ इति मेघेशफलं॥ अथ रसेशफलं॥ वापिकादिषु जलं न नितांतं
लोकवृंदसुरुशीतरुजांतं॥ इक्षुतैलयवतूलविनाशः स्याद्यदा रसपतिर्नलिनीशः॥१॥ प्रचुरमैक्षवतैलय
वादिकं मखकरं क्षितिदेवकदंबकं॥ दिशति दुग्धमतीव गवां ततिर्यदि रसाधिपतिर्रजनीपतिः॥२॥ गुडतैल
घृतादिकमल्पकमणिमुक्ताकनकादिनाधिकं॥ मधुपुष्पजलाल्पयस्तदा रसराजो वसुधात्मजो यदा॥३॥

(१५)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰ल॰ वापीतडागसरितादिषु पूर्णमंभः स्युंतीकणालसुनचित्रकहिंग्वलाभः ॥ जंबाम्रकामलकपुष्पमधूकपोष
१४ श्चंद्रात्मजोयदि रसाधिपतिर्नृतोषः ॥ ४ ॥ कुंकुमाद्युपचितिर्बेहूदकं स्यात्तथा रसफलेक्षुकादिकं ॥ चंद्रचंदन
सुवर्णसंभृतिश्चेद्भवेद्रसपतिर्बृहस्पतिः ॥ ५ ॥ लवणेक्षुतिलात्तसीजतुत्रपुकास्याद्यधिकं भवेन्नतु ॥ उशा
नारसनायकोयदा बहुकोशेयगवादिकं तदा ॥ ६ ॥ ऊर्णानि नीलोहजातं समर्घं रौप्यं स्वर्णाद्यं रसायं महर्घं ॥ वर्ष
त्यल्पं वारि वृंदारिकेशः पीडात्यंतं स्याद्यदार्की रसेशः ॥ ७ ॥ इतिरसाधिफलं ॥ अथपश्चिमधान्येशफलं ॥ ज्वरे
णसहितोजनोन बहुयाचनाक्लादिकं कुलं क्षितिभृतांमिथो रणविधायिनैवोदकं ॥ कुलित्थचणकादिकोपचि
तिरीतिभीतिः सदाभवेद्दिवसनायकश्चरमधान्यनाथोयदा ॥ १ ॥ भूभृतोखिलजनाश्चसंश्रियोसस्यदुग्ध
फलपुष्पसंचयः ॥ वासवः प्रचुरनीरदायकश्चेद्विधूश्चरमधान्यनायकः ॥ २ ॥ धान्याभावोदुर्लभं मूलकं
दं नीरं स्वल्पं युद्धरुद्भूपवृंदं ॥ रोगाद्बुन्हेभीप्रजानां समाजे पश्चाद्धान्यस्वामिनिस्मात्तनूजे ॥ ३ ॥ यवव्रीहिगो
धूममुद्रेक्षुकाणां प्रवृद्धिः सुरंवं सर्वविद्वज्जनानां ॥ अजागोमहिष्यादिकानां समारं बुधेप्रांतधान्याधिपे भू १४

रिनीरं ॥ ४ ॥ भूभृतामिह कदापिनमन्युर्भूरिवर्षतिजलं शतमन्युः ॥ भूमिदेवनिचयोभिमतेज्यः स्याद्यदाचरम
धान्यपईज्यः ॥ ५ ॥ क्षितिसुरामखकर्मणितत्परा बहुलमंबुनितांतकणाधरा ॥ तरुषुसत्फलपुष्पसमुद्भ
वश्चरमधान्यपतिर्यदिभार्गवः ॥ ६ ॥ निर्धनाः क्षितिभृतोरणादराः सस्यमल्पमतिरोगिणोनराः ॥ नैववर्षतिजलं
सुरेश्वरः स्याद्यदांत्यकणपः शनैश्चरः ॥ ७ ॥ इतिपश्चिमधान्येशफलं ॥ अथार्द्राप्रवेशतिथिफलं ॥ रवेरार्द्राप्रवे
शेयज्जन्मोद्भवजफलं ॥ तत्तद्विज्ञायसकलं प्रकुर्कुपद्येबुवधुना ॥ १ ॥ प्रतिपद्दिवसेभानोर्यदार्द्रायांप्रवेश
नं ॥ नृणांगृहेगृहेतर्हि भवेन्मंगलवर्धनं ॥ १ ॥ भानोर्यदिद्वितीयायांभवेदार्द्राप्रवेशनं ॥ तर्हिस्यात्सर्वधान्या
नांवस्त्रादीनांविवर्धनं ॥ २ ॥ भास्करस्यतृतीयायांयदार्द्रायांप्रवेशनं ॥ ईतिभीतिर्भवेत्तर्हितस्करादिविवर्ध
नं ॥ ३ ॥ गणपतितिथ्यांस्मरहररधिष्ण्ये ॥ यदिरविवेशोध्रुवमशुभं स्यात् ॥ ४ ॥ पंचम्यांरौद्रनक्षत्रंप्रयातियदि
भानुमान् ॥ सर्वेषांप्राणिनांतर्हि फलं स्यादुत्तमोत्तमं ॥ ५ ॥ षष्ठ्यामार्द्राप्रवेशश्चेज्जायतेपद्मिनीपतेः ॥ तर्हि
द्रविणसंपत्यानराणांप्रचुरंसरवं ॥ ६ ॥ भास्करो भास्करतिथौयदार्द्रायांप्रवेशनं ॥ कर्वतनतर्हिलोकानांसंततंस्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क.ल.
१५

यमुत्तमं ॥७॥ यदिस्यादष्टमीतिथ्यामार्द्रानक्षत्रगेरविः ॥ सस्यानांवाससांमूल्यंस्वल्पवृष्टिर्नसंशयः ॥८॥ सूर्य-
स्यशिवनक्षत्रप्रवेशेनवमीयदि ॥ तर्हिस्यात्समताभीतेरेवमाहुर्मनीषिणः ॥९॥ सूर्यस्यरुद्रसंवेशेयदिस्याद्दश-
मीतिथौ ॥ नानाविधानिकार्याणिमंगलानिदिनेदिने ॥१०॥ एकादश्यांतिथौसूर्योरौद्रभंयातिचेत्तदा ॥ सकलंधन-
धान्यादिसुभिक्षंजायतेध्रुवं ॥११॥ द्वादश्यांशिवनक्षत्रंप्रविष्टश्चेद्दिवाकरः ॥ नानाविधंशुभंतर्हिजनःप्राप्नोतिनि-
श्चितं ॥१२॥ दिवाकरस्यरौद्रभेप्रवेशेचत्रयोदशी ॥ तिथिर्यदिस्थितिस्तुदायनेदनघंलंजलं ॥१३॥ दिवाकरस्यरौ-
द्रभेप्रवेशेनचतुर्दशी ॥ समस्तधान्यवाससांमहर्घतांभवेत्तदा ॥१४॥ पौर्णमास्यांदिनेशश्चेदार्द्रानक्षत्रगोभवेत्
प्रजानांतर्हिविविधाऽसंपूर्णास्युर्मनोरथाः ॥१५॥ अमायांपद्मिनीनाथेरौद्रनक्षत्रगेसति ॥ भूमिपानांविनाशः
स्यात्तस्कराणामुपद्रवे ॥१६॥ इतितिथिफलं ॥ अथार्द्राप्रवेशेवारफलं ॥ दिनपतिवारेपशुपतिधिष्ण्ये ॥ दिनप-
निवेशेसतिपशुनाशः ॥१॥ शशिधरवारेस्मरहरधिष्ण्ये ॥ दिनकरवेशेसतिहिसुभिक्षं ॥२॥ भावोर्वेशःपृथ्वीसूनो-
र्वारेरौद्रेधिष्ण्येचेत्स्यात् ॥ शस्त्रघातात्पृथ्वीशानांनिःसंदेहंमृत्युस्तर्हि ॥३॥ बुधस्यवासरेरौद्रेधिष्ण्येभानुःप्रया- १५

तिचेत् ॥ तर्हिब्राह्मणजातीनांकल्याणान्यमिताक्षणाः ॥४॥ सुरराजगुरोर्वारेद्युमणिर्यदिरौद्रगः ॥ सर्वेषांत-
र्हिजंतूनांद्रव्यवृध्यासुखंबहु ॥५॥ दैत्यराजगुरोर्वारेयदिस्याद्रौद्रगेरविः ॥ तर्हिशांतिश्चपुष्टिःस्यात्तुष्टिःप्रतिदिनंनृ-
णां ॥६॥ शनैश्चरस्यवारेचेद्रविरार्द्रागतोयदि ॥ कृशतातर्हिलोकानांनितांतंमंदबुद्धिता ॥७॥ इतिवारफ-
लं ॥ अथार्द्राप्रवेशेनक्षत्रफलं ॥ रविरार्द्राप्रवेशेचेद्दास्रभंदिनभंभवेत् ॥ अश्वादिपशुसंघस्यवृद्धिस्यान्मं-
गलानिच ॥१॥ अर्कस्यरौद्रसंवेशेभरणीचंद्रभंयदि ॥ तर्हिस्याद्रोगबाहुल्यंशुभंनैवकदाचन ॥२॥ कृत्तिका
यदिचांद्रंसीमीशधिष्ण्यंगतेरवौ ॥ अग्न्यादिकभयंभूरितर्हिस्यात्तांबुवर्षणं ॥३॥ रोहिणीचंद्रनक्षत्रेभा-
नुरार्द्रागतोयदि ॥ सर्वधान्यविनिष्पत्यासंतोषोविलदेहिनां ॥४॥ यदिरौद्रंप्रविष्टोर्कोमृगांकेमृगगेसति-
धान्यांबरघृतादीनांप्राबल्यंतर्हिजायते ॥५॥ रौद्रनक्षत्रगेचंद्रेरौद्रभंयातिचेद्रविः ॥ सकलाःप्राणिन-
स्तर्हिरौद्रकर्मप्रकुर्वते ॥६॥ अर्कस्यरौद्रसंवेशेयदिचांद्रंपुनर्वसु ॥ अभिवृद्धिःसमस्तानांसस्यानांतर्हिनि-
श्चयात् ॥७॥ दिनसैपुष्पनक्षत्रेरौद्रंप्रजातिचेद्रविः ॥ तदाजलप्लुताभूमिःसर्वधान्यसमन्विता ॥८॥ सार्पभंदि-

16

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क.ल. नभंचैत्स्यादर्कस्यार्द्राप्रवेशने॥वारुणंकर्मलोकानांभवेत्सौख्यविनाशनं॥९॥रौद्रंविशतिचेद्भानुःपितृभेचंद्र-
१६ संयुते॥अल्पवृष्टिस्तदाज्ञेयाकंदमूलादिकाल्पता॥१०॥भगभेसतिचंद्रर्क्षेजायतेरौद्रगेरविः॥तदाभूमिभृतां
कीर्तिरत्यंतंभाग्यवर्धनं॥११॥यदिरौद्रगआदित्येश्चंद्रभेयमदैवते॥तदासस्याभिवृद्धिःस्यात्पुत्रपौत्रयुतो
जनः॥१२॥हस्तनक्षत्रगेचंद्रेरौद्रनक्षत्रगोयदि॥सवितास्यात्तदासर्वेसस्यसौख्यसमन्विता॥१३॥सवि
तायदिरौद्रर्क्षेनजेच्चित्रागतेविधौ॥तदाचित्राणिधान्यानिसर्वदैवशुभंभवेत्॥१४॥भास्करेरौद्रगस्येस्या
न्मारुतेदिनभेसति॥धनधान्यसमृद्धिःस्याद्धर्मवृद्धिर्दिनेदिने॥१५॥विशाखायदिचांद्रर्क्षेभानोरार्द्राप्रवशने॥तदा
निखिलरोगाणांविनाशोजायतेध्रुवं॥१६॥शशांकसहितेमैत्रेशिवभंयातिचेद्रविः॥सर्वलोकाश्चभूपाश्चसंतु
ष्टास्युस्तदाभृशं॥१७॥इंद्रभेचंद्रसंयुक्तेसवितारौद्रगोयदि॥तदासकललोकानांजायतेप्रचुरंभयं॥१८॥चं
द्राक्रांतेनैर्ऋतिभेयदार्द्रारविसंयुता॥भयंनानाविधंपुंसांकृशत्वरोगवृद्धिदाः॥१९॥आर्द्राचेद्रविनायुक्ता
तोयभेदिनभेसति॥तर्हिसर्वेमहीपालाःपरस्परविरोधिनः॥२०॥वैश्वभेचंद्रसंयुक्तेरौद्रभंयदिसूर्ययुक्॥तदा १६

१७
नराःस्वकर्माणिकुर्वंतेमंगलान्विताः॥२१॥श्रवणेचंद्रसहितेरविणारौद्रभंयदि॥सहितंस्यात्तदालोकाः
पुत्रसौख्यसमन्विताः॥२२॥सवितुःशिवनक्षत्रप्रवेशसमयेभवेत्॥वासवंयदिचांद्रर्क्षंतदाबहुफलादि-
कं॥२३॥शशिनावारुणेयुक्तेरविणाशिवदैवतं॥यदिस्यात्सहितंतर्हिजलपूर्णावसुंधरा॥२४॥पूर्वाभाद्र
पदाधिष्ण्येरजनिपतिसंयुते॥यद्यर्कोरौद्रभंयातितदासर्वेसुखोदयाः॥२५॥चांद्रेहिर्बुध्न्यनक्षत्रेरौद्रंचे
दर्कवेशनं॥तदासर्वाणिकार्याणिसिद्धिंयातिनृणांसदा॥२६॥शशिभृतिपौष्णेसतियदिरौद्रं॥प्रविशति
भानुर्नृपतिनिधनं॥२७॥इतिनक्षत्रफलं॥अथार्द्राप्रवेशेयोगफलं॥प्रथमजयोगेत्रिनयनधिष्ण्ये॥
यदिरविवेशोबहुवसुसस्यं॥१॥प्रीतियोगेविद्यमानेसत्यर्कोयदिरौद्रगः॥सर्वावसुमतीतर्हिसलिलेनप
रिप्लुता॥२॥आयुष्मत्संज्ञकेयोगेयदिभास्वान्शिवर्क्षगः॥तर्हिसर्वेमहीपालाःस्वस्थचित्तानिरामयः
॥३॥सौभाग्यनामकेयोगेरौद्रगश्चेद्दिवामणिः॥सौभाग्यरोगतावाप्तिस्तर्हिस्यात्सर्वदेहिनां॥४॥सति
शोभनयोगेचेद्रौद्रगःपद्मिनीपतिः॥शोभनंकर्मकुर्वंतिनर्हिसर्वेजनानृपाः॥५॥अतिगंडाख्ययोगेचेदार्द्रां

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क.ल. यातिदिवाकरः॥ परस्परंतुयुद्धंचतर्हिकुर्वंतिभूमिपाः॥६॥ सुकर्मनामयोगकेयदीशभंरविर्व्रजेत्॥ तदा
१७ समस्तभूसुराःसुकर्मकर्तुमुद्यता॥७॥ सतिधृतियोगेयदिदिवसेशः॥ प्रविशतिरौद्रंभवतिसुभिक्षं॥८॥
योगेशूलाभिधानेचेद्रौद्रंयातिदिवाकरः॥ शूलादिकैर्महारोगैःपीडास्यंततदानृणां॥९॥ गंडयोगेवर्तमानेरौ
द्रंयद्यहभास्करः॥ तदातुशांतिकर्माणिकुर्वंतिनिखिलाजनः॥१०॥ तरणिर्यदिरौद्रर्क्षप्रवेशेवृद्धियोगकः
पुत्रपौत्राभिवृद्धिःस्यात्तर्हियज्ञादिकर्मेच॥११॥ सतिध्रुवाख्येयोगेचेद्रौद्रगस्याद्दहःपतिः॥ जनाजनेशाः
सर्वेपिनैवचंचलमानसाः॥१२॥ व्याघातनाम्नियोगेचद्रविणाक्रांतमीशभं॥ तदाजनानांसर्वेषांदुर्भिक्षा
त्प्राणनाशनं॥१३॥ रवेरार्द्राप्रवेशस्यसमयेयदिहर्षण॥ सर्वधान्यादिसंवृध्याप्राणिनांहर्षसंभवः॥१४॥ व
ज्राभिधानयोगेचेत्तपनोरौद्रगोभवेत्॥ तर्हिभूपालकलहःक्वचित्स्याज्जलवर्षणं॥१५ मार्त्तंडःसिद्धियो
गेचेत्कुर्याद्रौद्रप्रवेशनं॥ धनधान्यांबरादीनांवृद्धिःस्यात्तर्हिवोगद॥१६॥ व्यतिपाताभिधेयोगेरविरार्द्रा
गतोयदि॥ तर्हिराज्ञांजनानांचनिश्चयेनधनक्षयः॥१७ वरीयान्वर्तमानश्चेद्रवेरा द्राप्रवेशने॥ अ- १८

१८
ल्पवृष्ट्याःखिलंधान्यंकंदमूलादिदुर्लभं॥१८॥ परिघेसतियोगेचेद्द्युमणिःशिवभंव्रजेत्॥ तदाधर्मार्थयोर्ना
शोराजानःपरिपीडिताः॥१९॥ शिवयोगेशिवर्क्षेचेद्व्रजेद्दिवसनायकः॥ सदाचाररताःसर्वेसदामांगल्यभा
गिन॥२०॥ सिद्धियोगेसहस्रांशोशिवनक्षत्रयायिनि॥ ओदनानांहिकार्याणांसिद्धिसस्यादिकंबहुः॥
॥२१॥ अंशुमान्रौद्रनक्षत्रंसाध्ययोगेप्रयातिचेत्॥ असाध्यमपिसाध्यंस्यात्कार्यंनहिवपुष्मतां॥२२॥ शु
भयोगेदिनेशश्चेन्नक्षत्रंधूर्जटीव्रजेत्॥ तर्हिकीलालवृष्टिःस्यात्सर्वेसंतुष्टमानसा॥२३॥ शुक्लयोगे
दिनकरे कृतरौद्रागमेसति॥ जलवर्षणयोगेनधान्याद्युपचयोभवेत्॥२४॥ ब्रह्माभिधानयोगेचे-
न्नलिनीशःशिवर्क्षगः॥ जलंचसकलंधान्यंमध्यमंतर्हिजायते॥२५॥ ऐंद्राभिधानयोगेचेद्धिरोचनसम
न्वितः॥ त्रिलोचननक्षत्रंतदानीजलवर्षणं॥२६॥ सतिवैधृतियोगेचेत्तरणिःशिवधिष्ण्यगः॥ सर्वे
षामपिजंतूनांतदाव्याधिभयंभवेत्॥२७॥ इतियोगफलं॥ आर्द्राप्रवेशवेलाफलं॥ पार्वतीरमणभं
दिवायदास्याद्दिवाकरसमन्वितंतदा॥ जायतेवसुमतीकणानितान्तस्करादिकभयंजलाल्पता॥१॥ नि
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(18)

क०ल १८

ग्रायांयदारौद्रभेर्कप्रवेशस्तदातीव्रवृष्टिंविधत्तेसुरेशः॥ गावोस्यासुखंसर्वसस्यप्रभूतंमहीपालवृंदंरणेनैव
सक्तं॥२॥ रौद्रप्रवेशेतरणेर्विधुश्चेत्त्रिकोणसंस्थोथचतुष्टयस्थः॥ जलस्रीगोवाशुभवीक्षितोवाधान्यंप्रभूतंनि
खिलंतदानीं॥ इतिवेलाफलं॥ अथनवविधमघानयनंतत्फलानिच॥ शाकेद्विगुणितेनंदैः९र्भाजितेशेषतो
घनः॥ आवर्तएकशेषेस्यात्संवर्त्तोद्वयोर्हिशेषके॥३॥ त्रिशेषेपुष्करोद्रोणश्चतुःशेषप्रकीर्तितः॥ कालनामपंचशे
षषट्शेषेनीलकःस्मृतः॥२॥ वरुणःसप्तशेषस्याद्वायुरष्टावशेषके नवशेषतमोनामक्रमान्मेघानवस्मृताः
॥३॥ विनाशनंशालियवादिकानांतथैवकार्पासघृतादिकानां॥ घनोयदावर्तकनामधेयःस्वल्पंजलंस्याद्ध
निनामपायः॥४॥ कमाधिक्यंस्वल्पताधर्मकार्येपृथ्वीपालास्तत्परानान्यकार्ये॥ संवर्त्तोद्वयोर्नीरदस्याद्धि
यत्रप्रांचोवायुर्यातिसर्वत्रतत्र॥५॥ नैवकंदफलमूलविवृद्धिर्जायतेविविधपातकवृद्धिः॥ रोगतोजनक
शतमनल्पंपुष्करेजलधरेजलमल्पं॥६॥ महीशाःस्वसंपत्तिवृद्ध्याःसमेताःसमस्तामहीभूरिधान्येनयु
क्ता॥ यदाजायतेद्रोणनामापयोदस्तदादेवराजोभवेत्तस्ययोदः॥७॥ रोगतोविकलतावपुष्मतांस्यान्निशः १०

११

कलहताक्षमाभृतां॥ कालनामजलदोदयेयदानैववर्षतिजलंवृषातदा॥८॥ सस्यपोदिशतिगोकुलपूर्णोव
स्त्रताखिलमहीपरिपूर्णा॥ नीलनाम्निजलदोजलवृष्टिर्जायतेसकलमानवतुष्टिः॥९॥ अग्निहोत्रकर
णादराद्विजाःस्युःसदाधिकमुदोखिलाप्रजा॥ अर्णवेनसहितंमहीतलंवारुणेजलधरेभवेद्दलं॥१०॥ नै
वांबुवृष्टिंकुरुतेसुरेशःसमस्तधान्यार्बरकन्यनाशः॥ धराधरस्यायदिवायुनामाजनाव्रजस्तर्हिविहीं
नधामा॥११ रोगाधिक्यंजायतेनीरशेषश्चौराधिक्यंनैवधान्यस्यपोषः॥ यस्मिन्वर्षेस्यात्तमोनाममेघ
स्तस्मिन्दुःखंप्राप्नुयाल्लोकसंघः॥१२॥ इतिनवविधमेघानयनंतत्फलानि॥ अथदेशविशेषेणमेघानयनं
तत्फलानिच॥ शाकेद्विगुणितेसैकेचतुर्भक्तेसशेषतः॥ ऐरावतोमहापद्मःकुंजितोवामनोघनः॥१॥ भा
गीरथीहिमवतोरंतरेयःप्रदेशकः॥ तत्रांबुवृष्टिकर्तास्यान्मेघऐरावतादिकः॥२॥ शाकस्त्रिगुणितः
सैकोवेदहृच्छेषतोघनः॥ मंदनामामंदभद्रोमृगमंदोमहास्वनः॥३॥ जान्हवीविंध्याचलयोमध्येय
स्यात्प्रदेशकः॥ मंदादिकोजलधरस्तत्रवर्षणकृद्भवेत्॥४॥ एकयुक्तेशकेवेदैर्भक्तेशेषांकतोघनः

79

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क.ल ११ विद्युज्जिव्होदिकोमेघोवृष्टिकृत्तत्रजायते॥५॥ वन्हिभिर्भोजितेशाकेघनःशेषांकसंमितः॥सिंधुभितोमहाका
यःपर्जन्याख्यःप्रकीर्तितः॥६॥ गोदायाम्याब्धिमध्यस्थायस्याद्भूमिप्रदेशकः॥करोतिवर्षणंतत्रसिंधुभं
ताधिकोघन॥७॥एकेनसहितोशाकोनेत्रद्वेषतोघनः॥संवर्त्तनामाप्रथमोद्वितियःपुष्कराभिधः॥८॥
कृष्णातोदक्षिणेभागेयावद्रामेश्वरःसुरः॥ वृष्टिकृत्तत्रदेशेस्यात्संवर्त्ताख्यःपयोधरः॥९॥ इतिदेशविशेषे
णमेघानयनंतत्फलानिच॥अथद्वादशनागफलानिच॥शाकेद्वाभ्यांयुतःसूर्यैर्भक्तःशेषांकतःफणी॥
सुबुध्नाख्योनंदसारीककोटाख्यःपृथुश्रवः॥१॥ वासुकिस्तक्षकाख्यःस्यात्कंबलोश्वतरस्तथा॥हेम
मालीनरेंद्राख्योवज्रदंष्ट्रोरषाभिधः॥२॥सुबुध्ननामसहितोभुजंगोजायतेयदा॥नृणांसुबुद्धिकर्त्तास्या
न्मध्यवृष्टिप्रदायकः॥३॥यस्मिन्वर्षेनागराजोनंदसार्यभिधानकः॥तस्मिन्वर्षेमहावृष्टिंकुरुतेनंदतेजनः
॥४॥ यदाकर्कोटनामाचजायतेपवनाशनः॥तदानांबुददातींद्रोमरणंस्यान्महीपते॥५॥ पृथुश्रवाभुजंगेंद्रो
जायतेयत्रवत्सरे॥तत्रकीलालमल्पंस्यात्सस्यहानिरसंशयं॥६॥उदेतियत्रवत्सरेसवासुकिभुजंगमः ११

२०
प्रभूतधान्यदायकःसुवृष्टिकारकस्तथा॥७॥तक्षकाभिधानागेंद्रोजायतेयत्रवर्षके॥तत्रमध्यमवृष्टिःस्याद्धि
महान्नृपतेर्भीतिः॥८॥ यदेवकंबलाभिधोभुजंगमप्रजायते॥तदास्तिमध्यमंजलंसमस्तधान्यमुत्तमं॥९॥
यस्मिन्नब्देभुजंगेंद्रोजायतेश्वतराभिधः॥नवर्षतिजलंवज्रीतदासस्यविनश्यति॥१०॥ हेममालिनिना
गेंद्रेजायतेत्वखिलामहीसमस्तधान्यसंपूर्णाप्रभूतजलवृष्टितः॥११॥ यत्रसंवत्सरेनागोनरेंद्रोनामतःप्रभु
भः॥तदास्यान्निखिलापृथ्वीप्रभूतजलपूरिता॥१२॥यत्रसंवत्सरेनागोवज्रदंष्ट्राभिधानकः॥तदांबुवर्ष
णंनैवसर्वसस्यविनाशनं॥१३॥यदारषाभिधानस्तुभुजंगाख्योपदाभवेत्॥ तदासस्यादिकाल्पत्वंसुतरामीति
तोभयं॥१४॥इतिद्वादशनागानयनंतत्फलानि॥अथार्द्रादिदशनक्षत्राणांगर्भलक्षणं॥मूलाघेषुदशो
न्मितेषुरविभेष्वभ्राबुशंवोदयश्चेत्स्यात्तर्हिशिवर्क्षतोरविभुजांगर्भोदशानांभवेत्॥गर्भोह्याछरनंदभू
१९५मितदिनेवृष्टिस्तुमेघेरवौचार्द्रादेर्दशकेभिनोबुधजनानार्भलक्षणोबुधैः॥१॥ इत्यार्द्रादिदशनक्षत्रा
णांगर्भलक्षणं॥अथरोहिणीचक्रं॥मेघाकेदिननक्षत्राद्ध्येयुग्मंतटेद्वयं॥गिरावेकंद्वयंसंधौसाभिज्ञि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं. स्त.
२०

दूणनाभवेत्॥१॥यदापयोनिधिस्थलंगर्त्तैविरिचिभंतदा॥अतीचवर्षणंभवेत्समस्तधान्यवर्धनं॥२॥यदिवि
धिधिष्ण्यंपततीतटस्थे॥ बहुजलवृष्टिर्धनकणवृद्धिः॥३॥रोहिणीनामनक्षत्रंपर्वतस्थंयदाभवेत्॥खंड
वृष्टिस्तदाज्ञेयासर्वसस्यविनाशनं॥४॥संधिसंस्थंयदाब्राह्मंजायते॥खंडवृष्टिस्तदासर्वधान्यक्षयः
॥५॥इतिरोहिणीचक्रं॥आयव्ययान्कथ्यते॥कलिशेषंततःस्थाप्यखखखाब्धांकवेद ४९०००० युक्
कलिभक्तंपातकंचलब्धंतद्धमेउच्यते॥१॥खखखाभ्रतर्कभूपमैकलेभ्य २१६००शे
षकंभजेत्॥फलंहिपुण्यमीरितंनखच्युतंतुपातकं॥१॥षडूरवौ६शरभुवो१५२
जनीशे ३८ कुजेनगभुवः१७शशिपुत्रे॥जीवशुक्रयुगलेनवचंद्रा १९ भास्करस्यत
नयेचदशाष्ट॥अत्रिघेत्रयंवर्षयतिराशिपवत्सरैक्येपंचान्वितेतिथिहृतेसतिशेषमा
याः॥लब्धेहुताशनहृतेपवनैःसमेतेतिथ्याहृतेसतिचशेषमितेव्ययस्यात्॥३॥
अवधिस्थग्रहकालाः खखनागहृताःफलं॥गतभान्यवशेषंतुखखनेत्रो १



२०

धृतंगताः॥१॥एष्यभस्यांघ्रयश्चाथतच्छेषंगतिभाजितं॥एष्यांघ्रिदिवसायातागतिभक्ताःखखाश्विनः॥चर
णस्योन्मितिप्रोक्ताएवंस्युश्चरणात्मिकाः॥१॥ ॥मेषप्राप्तेरवौमंत्रीकोशपोवृषसंक्रमः॥मीथुनेचभवे
द्युद्धकर्कटेसस्यनायकः॥३॥सिंहेसेनाधिपश्चैवकन्याछात्रेप्रजायते॥तुलाधिपोरसानांचप्रत्तापेश
श्चवृश्चिके॥२॥धनुर्धान्याधिपश्चैवमकरेनिरसाधिपे॥कुंभेव्यापारगश्चैवमीनेचव्यवहारिके॥३॥
विदरसेंद्रियभू १५६४ मितशाकेकार्तिकसंज्ञकमासिसितेदुं॥आद्यतिथौभृगुजेनलधिष्ण्येकल्पल
तापरिपूर्तिमुपेता॥४॥इतिजलदग्रामवासीरुद्रभट्टात्मजसोमदैवज्ञविरचिताकल्पलतासमाप्ता
वाराणसीप्रसादस्यनियोगेनतुयत्नतः॥काशीसंस्कृतमुद्रायामङ्कितोयंविचक्षणैः॥१॥काश्यांत्रिपु
रभैरवीसन्निधौश्रीयुतबाबूफतेहनारायणसिंहजीत्यभियुजोनिकेतनेकाशीसंस्कृतमुद्रायंत्रेङ्कि
तोयम्॥ ॥संवत् १९२६॥शाके १७९१ मितिअधिकवैशाखकृष्ण ११ शुक्रवार॥ ॥ ॥गणेशप
न्तेनलिखिता॥छापनेवालाइर्सनकारिगर॥ ॥ ॥ ॥ ॥

(५)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥इतिकल्पलतासमाप्ता॥ ॥

KKSU LIBRARY
RAMTEK
441 106
M-1222
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 17:08
,TRANSFERRED=2020/10/22 at 17:12:00
,PAGES=22
,TYPE=STD
,NAME=S0004438
,Book Name=M-1222-KATYALATA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection